# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१६

कक्षा – तत्त्वाचार्यप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – २** गुणाः - ७०

विषयः –ज्योतिषम् समयः – ११:००-०२:००

दिनाङ्कः – २५-११-१६ सन्दर्भग्रन्थः – जातकतत्वम्

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितयोः एकस्य सान्वयं व्याख्या कार्या।** ०४

(१) वक्रिणस्तु महावीर्याः शुभाः राज्यप्रदाः ग्रहाः।
पापाः व्यसनदाः पुंसां कुर्वन्ति च वृथाटनम्॥

(२) मन्दर्क्षे शुक्रे देहे दौर्गन्ध्यम्
षष्ठेशेज्ञेर्क्षे वानक्रे देहे दौर्गन्ध्यम्।
मेषगे चन्द्रेऽङ्गे देहे दौर्गन्ध्यम्
ज्ञर्क्षे शुक्रे ज्ञयुते केन्द्रे देहे दौगन्ध्यम्।

**प्रश्नः – २ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत।** १२

(१) ग्रन्थानुसारग्रहस्वरूपवर्णनम्

(२) जातकः कदा शूरः भविष्यति? सविस्तरं वर्णयत।

**प्रश्नः – ३ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** ०४

(१) जारजयोगभंगज्ञानम्

(२) दुर्व्यसनयोगः

(३) धनस्य प्राप्तिः कस्मिन् दिशि भवति?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ४ अधोलिखितयोः एकस्य सप्रसङ्गं व्याख्या कार्या।** ०४

(१) जीवेऽङ्गेऽथ मन्दे सोत्थेशराहौ माता न जीवति।
सोत्थेऽस्तेऽर्के लग्ने भौमे माता न जीवति।

(२) गेहेशेऽर्थे सपापे नीचारिभे भूमिविक्रेता।
गेहेशेतुङ्गेऽर्थेशे पापे नीचारिभे भूमिविक्रेता।

**प्रश्नः – ५ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखत।** १२

(१) सुखप्राप्तियोगाः

(२) भूमिनाशयोगाः

**प्रश्नः – ६ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** ०४

(१) मातृस्नेहयोगः

(२) ब्रह्मनिष्ठयोगः

(३) सन्तानस्य शीघ्रप्राप्तिः कदा भवेत्?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ७ अधोलिखितयोः एकस्य सूत्रस्य सान्वयं व्याख्या कार्या ।** ०४

(१) आयु:शस्त्रधारणरोगसंकटछिद्रजीवितगुह्य स्थान-
नद्यूत्तारात्यन्तदुर्गादि आयुस्थान्चिन्त्यम्।

(२) चन्द्राद् वा शुक्राद्धनं मन्देऽयश्च
चन्द्राच्छदौ लग्ने मन्देदृष्टेऽयश:॥

**प्रश्नः – ८ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखत ।** ०८

(१) मरणकारणज्ञानम्

(२) जातक: कदा पापकर्मरत: भवति? व्याख्यायताम्

**प्रश्नः – ९ अधोनिर्दिष्टेषु त्रयाणाम् अतिलघूत्तरं यच्छत** ०३

(१) सर्पान्मृति: कदा भवति?

(२) राहुसूर्ययोगे मृति कुत्र भवति?

(३) "भौमेऽरिगे" इस्त्यस्य कोऽर्थ:?

(४) नवमभावात् केषां विषयानां विचार भवति?

(५) तुर्येश: क:?

## चतुर्थान्वितिः (Unit-४)

**प्रश्नः – १० अधोलिखितयोः एकस्य सान्वयं व्याख्या कार्या ।** ०४

(१) सुतपस्त्रिके वाग्धीने विद्याहीनश्च।
सुतेशोज्ञेज्ययुतस्त्रिके वाग्विद्या प्रबन्धहीन॥

(२) इन्दो: षष्ठाष्टमगैरधियोग: शुभग्रहै:।
बलानुसारस्तत्र नृपोऽमात्यो बलाधिप:॥

**प्रश्नः – ११ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखत ।** ०८

(१) जातकस्य जन्मांगानुसारेण स्त्रीविचार

(२) त्रिंशांशफलम्

**प्रश्नः – १२ निम्नलिखितेषु त्रयाणाम् उत्तरं लिखत ।** ०३

(१) अङ्गेश: क:?

(२) "पापा: लग्नान्त्यस्तगा" इत्यस्य कोऽर्थ:?

(३) वैधव्यस्य विचार: कस्मिन् भावात् भवति?

(४) द्वादशेशस्य दशायां किं फलं प्राप्यते?

(५) गृहेश: क:?

***